## 6.2.1 Perspective/Strategic plan and deployment documents are available in the institution

**संस्थायां भविष्यद्योजनायाः / व्यूहात्मकयोजनायाः नियोजनप्रलेखाः क्रियान्वयनसम्बद्धानि प्रमाणानि वा उपलभ्यन्ते।**

Answer:

संस्कृतवाङ्मयं विविधशास्त्रभूयिष्ठमस्तीति विदितमेव । न केवलम् आध्यात्मिकशास्त्राणाम् अपि तु लौकिकानां वैज्ञानिकानां च बहूनां शास्त्राणां बहद्भाण्डागारोपमं वर्तते वाङ्मयमिदम् । अतः समग्रः सम्प्रत्ययः विश्वविद्यालयस्य भविष्यद्योजनायां सन्निहितः वर्तते यत्र हि शास्त्रसर्वस्वम् . सम्पत्सर्वस्वम् सङ्कलितं सम्मिलितं चास्ति। क्रमशः यथा –

१. **शास्त्रोज्जीविका** ( Mission mode project) हितशासकानि शास्त्राणि । अतः शास्त्राणां पुनरुज्जीवनाय विश्वविद्यालयः क्रियाशीलाः परियोजनाः निर्माति। विविधानां सङ्कानां विभागानां च समुद्घाटनेन प्रचारेण च शास्त्राणि परिरक्षितानि भवन्ति।

**२.शास्त्रसेतुः** (Shastra bridge program) एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम् इत्युच्यते। शास्त्राणि यद्यपि विभिन्नानि परं तानि सर्वाणि परस्परं सम्बद्धानि एव सन्ति। साङ्ख्ययोगयोः न्यायवैशेषिकयोः योगायुरुर्वेदयोः प्राचीनार्वाचीनयोः शास्त्रयोः इत्येवं विभिन्नानां शास्त्राणां सेतुपाठ्यक्रमाणां सम्प्रयोगः औपचारिकरूपेण विधातुम् विश्वविद्यालयः चिन्तयति।

**३.शास्त्रबीजरक्षा** ( Seed saving for the future) शास्त्राणि अनन्तानि। तत्र आद्यं शास्त्रम् इति प्रकीर्तितं साङ्ख्यशास्त्रं सम्प्रति नेपथ्यं गतमस्ति। सहस्रवर्त्मा सामवेदः इति उच्यते। सम्प्रति केवलं शाखात्रयम् उपलभ्यते। अतः वेदशास्त्राणां परिरक्षणाय अग्रिमसन्तत्यै प्रदानाय च शास्त्रबीजरक्षा इति योजना विश्वविद्यालयस्य भविष्यद्योजनायां समाहितम् अस्ति।

४. **शास्त्रदृष्टिः** (Shastric perception program) दृष्टिपूतं न्यसेत् पादम् इति उच्यते। शास्त्रदृष्टिः लौकिकालौकिकसुखमूला अस्ति इति ख्यापनाय तस्याः प्रत्यक्षीकरणरूपाणां कार्यक्रमाणां सङ्घटनाय विश्वविद्यालयः चिन्तनं करोति।

**५.शास्त्रप्रयोगः** (Application of Shastric Principles) 'शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान् ' इति सुभाषितकारः वदति। शास्त्राणि प्रयोगपथे न सन्ति चेत्तर्हि तानि निष्प्रयोजकानि सम्भवन्ति। न केवलं शिक्षाक्षेत्रे अपि प्रशासने प्रबन्धने च शास्त्रीयसिद्धान्तानाम् अनुप्रयोगाय विश्वविद्यालयः योजनाः विनिर्माति।

६. **शास्त्रसमन्वयः** (Shastra + Modern social science) सर्वे भवन्तु सुखिनः इति भारतीयानां चिन्तनधारा। एतदनु प्राचीनशास्त्राणाम् आधुनिकसामाजिकविज्ञानानां च मध्ये समन्वयं सम्पाद्य सम्मिश्रितपाठ्यचर्यां निर्माय तदध्ययनाय स्वतन्त्रतावसरकल्पनं विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गम् अस्ति। सर्वविधानां छात्राणां सर्वविधापेक्षायाः पूर्तिं कर्तुं समन्वयः अनिवार्यः एव ।नवशिक्षानीतिरपि प्राचीन–अर्वाचीनशास्त्राणां समन्वयसम्पदानाय संसूचनाः प्रायच्छत्।

**७. शास्त्रजीविका** (Employment/Livelihood focus) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः दैवेन देयमिति कापुरुषा वदन्ति इति सूक्तं सुभाषितकारेण। आजीविकाप्रदानाभावे शास्त्राणाम् अध्ययनाध्यापने समधिकोत्साहं न प्रकटयेयुः । संस्कृतज्ञानां कृते संस्कृतक्षेत्रे संस्कृतेतरेषु इतरेष्वपि क्षेत्रेषु विविधोद्योगावसरप्रकल्पनम् अपि विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गं वर्तते।

**८.मुक्तशास्त्रशाला** (Open, online , short time courses) बृहन्मुक्तान्तर्जालाश्रितपाठ्यक्रमः ( MOOCs) इत्येषः अन्तर्जालाश्रितः दूरस्थशिक्षाकार्यक्रमः अद्यत्वे शिक्षणाधिगमक्षेत्रे प्रसिद्धः प्रासङ्गिकः सामयिकश्च वर्तते। भौगोलिकदृष्ट्या दूरस्थाः अपि छात्राः शिक्षकाः च अस्य जालस्य माध्यमेन समीपस्थाः एकत्रिताः वा भवन्ति । जगतीतले यस्मिन् कस्मिन्नपि कोणे वसता शिक्षार्थिना निःशुल्कशिक्षाग्रहणाय परिकल्पितायाम् अस्यां अन्तर्जालाश्रितशैक्षिकव्यवस्थायां प्रत्यक्षरूपेण नियतरूपेण च ज्ञानसम्पादनाय विफलाः छात्राः लाभान्विताः सम्भवन्ति। अतः मुक्तशास्त्रशालानां प्रतिष्ठापनं विश्वविद्यालयस्य भविष्यद्योजनायाम् अन्तर्भवति।

**९. शास्त्रान्तरानुसन्धानम्** (Multidisciplinary research) बहुविषयकाध्ययनानुसन्धानसौकर्याणि प्रकल्प्य उच्चशिक्षासंस्थानां स्तरोन्नयनाय राष्ट्रियशिक्षानीतौ (NEP - 2020) नैकाः संसूचनाः प्रदत्ताः A Multi&disciplinary Education and Research Universities (MERU) इत्यस्य परिकल्पनानुसारं विश्वविद्यालये शास्त्रान्तरानुसन्धानाय विविधाः सक्रियाः भविष्यद्योजनाः सङ्कल्पिताः सन्ति।

**१०. शास्त्रज्योतिः** (Establishment of research centres) शास्त्रशस्त्राः आसन् बहवो हि मनीषिणः । आधारभूतम् अथवा विशुद्धम् अनुसन्धानं पूर्ववत् सम्पादयितुम् अनुसन्धानकेन्द्राणि अपेक्ष्यन्ते। सर्वेषु शास्त्रानुसन्धानकेन्द्राणि प्रतिष्ठाप्य नवनवीनतथ्यानां संशोधनाय शिक्षकेभ्यः शोधार्थिभ्यः च अवसरप्रकल्पनम् अपि भविष्यद्योजनासु मुख्या योजना एव वर्तते यथा शास्त्रसर्वस्वं भविष्यद्योजनायां सन्निहितं वर्तते तथैव सम्पत्सर्वस्वम् अपि सन्निहितं वर्तते। तद्यथा–

1.विश्वशान्त्यै धार्मिकसंवादकेन्द्रम्
2.सिन्धीपीठम् , उत्कलपीठम्
3.अन्ताराष्ट्रियं भारताध्ययनकेन्द्रम्
4.अन्ताराष्ट्रियं योगकेन्द्रम्
5.अन्ताराष्ट्रियं कौशलविकासकेन्द्रम्
6.अन्ताराष्ट्रियं पुरातत्त्वसंस्कृतकेन्द्रम्
7.वैदिक अध्ययन केन्द्रम्

ज्ञानं भारः क्रियां विना' इत्युक्तिं स्मारं स्मारं केन्द्रीयसंस्कृतविश्वविद्यालयः संस्कृतक्षेत्रस्य सर्वाङ्गीणविकासाय नैकविधाः भविष्यद्योजनाः निर्माति। विश्वविद्यालयस्य जालस्थाने एताः सर्वविधयोजनाः सविस्तरम् उल्लिखिताः सन्ति। व्यूहात्मकयोजनासु क्रियापराः समयसाध्याश्च याः योजनाः सन्ति तासां निर्वहणाय केन्द्रीयसंस्कृतविश्वविद्यालयस्य योजनाविभागः अनुदिनं कार्यं करोति। प्रतिवर्षं विश्वविद्यालयस्य योजनासम्बद्धानि विविधानि विज्ञापनानि पत्रिकासु

सामाजिकमाध्यमेषु च प्रकटीक्रियन्ते। विश्वविद्यालयस्य वार्षिकप्रतिवेदनेऽपि एतद्विषयकं विवरणं सविस्तरम् उपलभ्यते।

## सरस्वती भवन पुस्तकालय समुपलब्ध अप्रकाशित देवनागरी लिपिबद्ध पाण्डुलिपियों का मुद्रण एवं प्रकाशन

कार्य-योजना

2020-21 - पाण्डुलिपियों का वर्गीकरण एवं डिजिटिलाइजेशन

2021-22 - पाण्डुलिपियों का संरक्षण (रखरखाव) एवं पुर्ननिरीक्षण

2022-23 - पाण्डुलिपियों का आवरण परिवर्तन

2023-24 - लिपिबद्धता

2024-25 - परिमार्जन एवं संशोधन

2025-26 - मुद्रण एवं प्रकाशन